শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭১

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৭১

*কেশিমথনৱর্ণনং ৱ্যোমৱধৱর্ণনং চ*

যত্নেষু সর্ৱেষ্ৱপি নাৱকেশী
কেশী স ভোজেশিতুরিষ্টবন্ধুঃ।
ত্ৱাং সিন্ধুজাৱাপ্য ইতীৱ মত্ৱা
সম্প্রাপ্তৱান্ সিন্ধুজৱাজিরূপঃ॥ ১ ॥

গন্ধর্ৱতামেষ গতোপি রূক্ষৈ-
র্নাদৈঃ সমুদ্বেজিতসর্ৱলোকঃ।
ভৱদ্বিলোকাৱধি গোপৱাটীং
প্রমর্দ্য পাপঃ পুনরাপতত্ ত্ৱাম্॥ ২ ॥

তার্ক্ষ্যার্পিতাঙঘ্রেস্তৱ তার্ক্ষ্য এষ
চিক্ষেপ ৱক্ষোভুৱি নাম পাদম্।
ভৃগোঃ পদাঘাতকথাং নিশম্য
স্ৱেনাপি শক্যং তদিতীৱ মোহাত্॥ ৩ ॥

প্রৱঞ্চযন্নস্য খুরাঞ্চলং দ্রা-
গমুং চ চিক্ষেপিথ দূরদূরম্।
সম্মূর্চ্ছিতোপি হ্যতিমূর্চ্ছিতেন
ক্রোধোষ্মণা খাদিতুমাদ্রুতস্ত্ৱাম্॥ ৪ ॥

ত্ৱং ৱাহদণ্ডে কৃতধীশ্চ ৱাহা-
দণ্ডং ন্যধাস্তস্য মুখে তদানীম্।
তদ্ৱৃদ্ধিরুদ্ধশ্ৱসনো গতাসুঃ
সপ্তীভৱন্নপ্যযমৈক্যমাগাত্॥ ৫ ॥

www.prapatti.com

আলম্ভমাত্ৰেণ পশোঃ সুৰাণাং
প্ৰসাদকে নূত্ন ইৱাশ্বমেধে।
কৃতে ত্বয়া হৰ্ষৱশাত্ সুৰেন্দ্ৰা-
স্তৱাং তুষ্টুৱুঃ কেশৱনামধেয়ম্॥ ৬ ॥

কংসায় তে শৌৰিসুতত্বমুক্তৱা
তং তদ্বধোতকং প্ৰতিৰুধ্য ৱাচা।
প্ৰাপ্তেন কেশিক্ষপণাৱসানে
শ্ৰীনাৰদেন ত্বমভিষ্টুতোভূঃ॥ ৭ ॥

কদাপি গোপৈঃ সহ কাননান্তে
নিলায়নক্ৰীডনলোলুপং ত্বাম্।
ময়াত্মজঃ প্ৰাপ দুৰন্তমায়ো
ৱ্যোমাভিধো ৱ্যোমচৰোপৰোধী॥ ৮ ॥

স চোৰপালায়িতৱল্লৱেষু
চোৰায়িতো গোপশিশূন্ পশূংশ্চ।
গুহাসু কৃত্বা পিদধে শিলাভি-
স্তৱয়া চ বুদ্ধৱা পৰিমৰ্দিতোভূত্॥ ৯ ॥

এৱং ৱিধৈশ্চাদভুতকেলিভেদৈ-
ৰানন্দমূৰ্ছামতুলাং ব্ৰজস্য।
পদে পদে নূতনয়ন্নসীমাং
পৰাত্মৰূপিন্ পৱনেশ পায়াঃ॥ ১০ ॥

**********



www.prapatti.com